श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## उद्धव गीता - प्रथम सोपान

## Uddhava Geeta -Pratham Sopaan



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्**

***nārāyaṇaṃ (n) namaskṛtya, naraṃ(ñ)caiva narottamam***
**devīṃ(m) sarasvatīṃ (m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

***nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam***
***praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param***

**॥ ॐ नमो भगवते वासुदेवाय ॥**
**एकादशः स्कंधः**
**॥ अथ षष्ठोऽध्यायः ॥**

**Om namo bhagawate vasudevāya**
**Ekādaśah skandhah**
**Atha ṣaṣṭhodhyāyah**

**श्रीशुक उवाच**

**अथ ब्रह्माऽऽत्मजैर्देवैः(फ्), प्रजेशैरावृतोऽभ्यगात्।**
**भवश्च भूतभव्येशो, ययौ भूतगणैर्वृतः॥ 1॥**

**śrīśuka uvāca**

**atha brahmā''tmajairdevaiḥ(ph), prajeśairāvṛto'bhyagāt**

**bhavaśca bhūtabhavyeśo, yayau bhūtagaṇairvṛtaḥ ||1||**

brahmā''tma + jair + devaiḥ, prajeśairā + vṛto'bhyagāt,

bhūta + bhavyeśo, bhūtagaṇair + vṛtaḥ

**इन्द्रो मरुद्भिर्भगवा-नादित्या वसवोऽश्विनौ।**

**ऋभवोऽङ्गिरसो रुद्रा, विश्वे साध्याश्च देवताः॥ 2॥**

**indro marudbhirbhagavā-nādityā vasavo'śvinau**

**ṛbhavo'ṅgiraso rudrā, viśve sādhyāśca devatāḥ ||2||**

marud + bhir + bhagavā, ṛbhavo'ṅ + giraso

**गन्धर्वाप्सरसो नागाः(स्), सिद्धचारणगुह्यकाः।**

**ऋषयः(फ्) पितरश्चैव, सविद्याधरकिन्नराः॥ 3॥**

**gandharvāpsaraso nāgāḥ(s), siddhacāraṇaguhyakāḥ**

**ṛṣayaḥ(ph) pitaraścaiva, savidyādharakinnarāḥ ||3||**

gandharvāp +saraso, siddha + cāraṇa + guhyakāḥ, savidyā + dhara + kinnarāḥ

**द्वारकामुपसं(ञ्)जग्मुः(स्), सर्वे कृष्णदिदृक्षवः।**

**वपुषा येन भगवान्, नरलोकमनोरमः।**

**यशो वितेने लोकेषु, सर्वलोकमलापहम्॥ 4॥**

**Dvārakāmupasa(ñ)jagmuḥ(s), sarve kṛṣṇadidṛkṣavaḥ**

**vapuṣā yena bhagavān, naralokamanoramaḥ**

**yaśo vitene lokeṣu, sarvalokamalāpaham ||4||**

Dvārakā + mupa + sa(ñ)jagmuḥ(s), kṛṣṇadi + dṛkṣavaḥ,

nara + loka + manoramaḥ, sarvalo + kamalā + paham

**तस्यां(म्) विभ्राजमानायां(म्), समृद्धायां(म्) महर्द्धिभिः।**

**व्यचक्षतावितृप्ताक्षाः(ख्), कृष्णमद्भुतदर्शनम्॥ 5॥**

**tasyāṃ(m) vibhrājamānāyāṃ(m), samṛddhāyāṃ(m) maharddhibhiḥ .**

**vyacakṣatāvitṛptākṣāḥ(kh), kṛṣṇamadbhutadarśanam ||5||**

vibhrā + jamā + nāyāṃ(m), mahard + dhibhiḥ,

vyacakṣatā + vitṛp + tākṣāḥ(kh), kṛṣṇa + mad + bhutadarśanam

**स्वर्गोद्यानोपगैर्माल्यैश्- छादयन्तो यदूत्तमम्।**

**गीर्भिश्चित्रपदार्थाभिस्- तुष्टुवुर्जगदीश्वरम्॥ 6॥**

**Svargodyānopagairmālyaiś- chādayanto yudūttamam**

**Gīrbhiścitrapadārthābhis- tuṣṭuvurjagadīśvaram ||6||**

Svargo + dyāno + pagair + mālyaiś, yudūt + tamam,

Gīr + bhiś + citra + padārthā + bhis, tuṣṭuvur + jagadīśvaram

**देवा ऊचुः**

**नताः(स्) स्म ते नाथ पदारविन्दं(म्),**

**बुद्धीन्द्रियप्राणमनोवचोभिः।**

**यच्चिन्त्यतेऽन्तर्हृदि भावयुक्तैर्-**

**मुमुक्षुभिः(ख्) कर्ममयोरुपाशात्॥ 7॥**

**devā ūcuḥ**

**natāḥ(s) sma te nātha padāravindaṃ(m)**

**buddhīndriyaprāṇamanovacobhiḥ**

**yaccintyate'ntarhṛdi bhāvayuktai-**

**rmumukṣubhiḥ(kh) karmamayorupāśāt ||7||**

buddhīndriya + prāṇa + mano + vacobhiḥ, yac + cintyate'ntar + hṛdi,

karma +mayo + rupāśāt

**त्वं(म्) मायया त्रिगुणयाऽऽत्मनि दुर्विभाव्यं(म्),**

**व्यक्तं सृजस्यवसि लुम्पसि तद्गुणस्थः।**

**नैतैर्भवानजित कर्मभिरज्यते वै,**

**यत् स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः॥ 8॥**

**tvaṃ(m) māyayā triguṇayā''tmani durvibhāvyaṃ(m),**

**vyaktaṃ sṛjasyavasi lumpasi tadguṇasthaḥ**

**naitairbhavānajita karmabhirajyate vai,**

**yatsve sukhe'vyavahite'bhirato'navadyaḥ ||8||**

dur + vibhāvyaṃ(m), sṛjas + yavasi, naitair + bhavāna + jita,

karma + bhirajyate, sukhe' + vyavahite' + bhirato' + navadyaḥ

**शुद्धिर्नृणां(न्) न तु तथेड्य दुराशयानां(म्),**

**विद्याश्रुताध्ययनदानतपः(ख्)क्रियाभिः।**

**सत्त्वात्मनामृषभ ते यशसि प्रवृद्ध-**

**सच्छ्रद्धया श्रवणसम्भृतया यथा स्यात्॥ 9॥**

**śuddhirnṛṇāṃ(n) na tu tatheḍya durāśayānāṃ(m),**

**vidyāśrutādhyayanadānatapaḥ(kh) kriyābhiḥ**

**sattvātmanāmṛṣabha te yaśasi pravṛddha-**

**sacchraddhayā śravaṇasambhṛtayā yathā syāt ||9||**

śuddhir + nṛṇāṃ(n), vidyā + śrutā + dhyayana + dānatapaḥ(kh)

sattva + manā + mṛṣabha, śravaṇa + sam + bhṛtayā

**स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः(ह्),**

**क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः।**

**यः(स्) सात्वतैः(स्) समविभूतय आत्मवद्भिर्-**

**व्यूहेऽर्चितः(स्) सवनशः(स्) स्वरतिक्रमाय॥ 10॥**

**syānnastavāṅghriraśubhāśayadhūmaketuḥ(h)**

**kṣemāya yo munibhirārdrahṛdohyamānaḥ**

**yaḥ(s) sātvataiḥ(s) samavibhūtaya ātmavadbhir-**

**vyūhe'rcitaḥ(s) savanaśaḥ(s) svaratikramāya ||10||**

syān + nastavāṅghri + raśubhā + śaya + dhūmaketuḥ(h),

munibhi + rārdra + hṛdoh + yamānaḥ, sva + rati + kramāya

यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ,
त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा।
अध्यात्मयोग उत योगिभिरात्ममायां(ञ्),
जिज्ञासुभिः(फ्) परमभागवतैः(फ्) परीष्टः॥ 11॥

yaścintyate prayatapāṇibhiradhvarāgnau,
trayyā niruktavidhineśa havirgṛhītvā
adhyātmayoga uta yogibhirātmamāyāṃ(ñ),
jijñāsubhiḥ(ph) paramabhāgavataiḥ(ph) parīṣṭaḥ ||11||

yaś + cintyate, prayata + pāṇi + bhira + dhvarāgnau, nirukta + vidhineśa,
yogi + bhirātma + māyāṃ(ñ), parama + bhāgavataiḥ(ph)

पर्युष्टया तव विभो वनमालयेयं(म्),
सं(व्)स्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः।
यः(स्) सुप्रणीतममुयार्हणमाददन्नो,
भूयात् सदाङ्घ्रिरशुभाशयधूमकेतुः॥ 12॥

paryuṣṭayā tava vibho vanamālayeyaṃ(m),
saṃ(v) spardhinī bhagavatī pratipatnivacchrīḥ
yaḥ(s) supraṇītamamuyārhaṇamādadanno
bhūyāt sadāṅghriraśubhāśayadhūmaketuḥ ||12||

vanamā + layeyaṃ(m), prati + patni + vacchrīḥ,
supraṇīta + mamuyār + haṇamā + dadanno, sadāṅ + ghriraśubhā + śaya + dhūmaketuḥ

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको,
यस्ते भयाभयकरोऽसुरदेवचम्वोः।
स्वर्गाय साधुषु खलेष्वितराय भूमन्,
पादः(फ्) पुनातु भगवन् भजतामघं(न्) नः॥ 13॥

**Ketustrivikramayutastripatatpatāko,**

**yaste bhayābhayakaro'suradevacamvoḥ**

**svargāya sādhuṣu khaleṣvitarāya bhūman,**

**pādaḥ(ph) punātu bhagavan bhajatāmagham(n) naḥ ||13||**

Ketustri + vikrama + yutastri + patat + patāko,

bhayā + bhayakaro' + suradeva + camvoḥ, khaleṣ + vitarāya, bhajatā + magham(n)

नस्योतगाव इव यस्य वशे भवन्ति,

ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः।

कालस्य ते प्रकृतिपूरुषयोः(फ्) परस्य,

शं(न्) नस्तनोतु चरणः(फ्) पुरुषोत्तमस्य॥ 14॥

**nasyotagāva iva yasya vaśe bhavanti,**

**brahmādayastanubhṛto mithurardyamānāḥ**

**kālasya te prakṛtipūruṣayoḥ(ph) parasya,**

**śaṃ(n) nastanotu caraṇaḥ(ph) puruṣottamasya ||14||**

nasyo + tagāva, brahma + dayas + tanubhṛto,

mithurar + dyamānāḥ,

prakṛtipū + ruṣayoḥ(ph), puruṣot + tamasya

अस्यासि हेतुरुदयस्थितिसंयमाना-

मव्यक्तजीवमहतामपि कालमाहुः।

सोऽयं(न्) त्रिणाभिरखिलापचये प्रवृत्तः(ख्),

कालो गभीररय उत्तमपूरुषस्त्वम्॥ 15॥

**asyāsi heturudayasthitisaṃyamānā-**

**mavyaktajīvamahatāmapi kālamāhuḥ**

**so'yaṃ(n) triṇābhirakhilāpacaye pravṛttaḥ(kh),**

**kālo gabhīraraya uttamapūruṣastvam ||15||**

heturudaya + sthitisaṃya + mānā,

mavyakta + jīva + mahatā + mapi,

triṇā + bhirakhilā + pacaye, uttamapū + ruṣas + tvam

त्वत्तः(फ्) पुमान् समधिगम्य यया स्ववीर्यं(न्),
धत्ते महान्तमिव गर्भममोघवीर्यः।
सोऽयं(न्) तयानुगत आत्मन आण्डकोशं(म्),
हैमं (म्) ससर्ज बहिरावरणैरुपेतम्॥ 16॥

**tvattaḥ(ph) pumān samadhigamya yayā svavīryaṃ(n)**
**dhatte mahāntamiva garbhamamoghavīryaḥ**
**so'yaṃ(n) tayānugata ātmana āṇḍakośaṃ(m)**
**haimaṃ(m) sasarja bahirāvaraṇairupetam ||16||**

garbha + mamogha + vīryaḥ, bahirā + varaṇai + rupetam

तत्तस्थुषश्च जगतश्च भवानधीशो,
यन्माययोत्थगुणविक्रिययोपनीतान्।
अर्थां(ञ्)जुषन्नपि हृषीकपते न लिप्तो,
येऽन्ये स्वतः(फ्) परिहृतादपि बिभ्यति स्म॥ 17॥

**tattasthuṣaśca jagataśca bhavānadhīśo,**
**yanmāyayotthaguṇavikriyayopanītān**
**arthā(ñ)juṣannapi hṛṣīkapate na lipto,**
**ye'nye svataḥ(ph) parihṛtādapi bibhyati sma ||17||**

tat + tasthu + ṣaśca, yan + māyayottha + guṇa + vikriyayo + panītān,

arthā(ñ) + juṣan + napi, parihṛtā + dapi

स्मायावलोकलवदर्शितभावहारि-
भ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः।
पत्न्यस्तु षोडशसहस्रमनं(ङ्)गबाणैर्-
यस्येन्द्रियं(म्) विमथितुं(ङ्) करणैर्न विभ्व्यः॥ 18॥

**smāyāvalokalavadarśitabhāvahāri-**

**bhrūmaṇḍalaprahitasauratamantraśauṇḍaiḥ**

**patnyastu ṣoḍaśasahasramana(ṅ)gabāṇair-**

**yasyendriyaṃ(m) vimathituṃ(ṅ) karaṇairna vibhvyaḥ ||18||**

smāyā + valoka + lavadar + śita + bhāvahāri,

bhrūmaṇḍala + prahitasau + ratamantra + śauṇḍaiḥ,

ṣoḍaśa + sahasra + mana(ṅ) + gabāṇair

**विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः(फ्),**

**पादावनेजसरितः(श्) शमलानि हन्तुम्।**

**आनुश्रवं(म्) श्रुतिभिरङ्घ्रिजमङ्गसङ्गैस्-**

**तीर्थद्वयं(म्) शुचिषदस्त उपस्पृशन्ति॥ 19॥**

**vibhvyastavāmṛtakathodavahāstrilokyāḥ(ph),**

**pādāvanejasaritaḥ(ś) śamalāni hantum**

**ānuśravaṃ(m) śrutibhiraṅghrijamaṅgasaṅgais-**

**tīrthadvayaṃ(m) śuciṣadasta upaspṛśanti ||19||**

vibhvyas + tavā + mṛtakatho + davahāstri + lokyāḥ(ph), pādā + vane + jasaritaḥ(ś),
śrutibhiraṅ + ghrijamaṅ + gasaṅgai, tīrthad + vayaṃ(m)

**बादरायणिरुवाच**

**इत्यभिष्टूय विबुधैः(स्), सेशः(श्) शतधृतिर्हरिम्।**

**अभ्यभाषत गोविन्दं(म्), प्रणम्याम्बरमाश्रितः॥ 20॥**

**bādarāyaṇiruvāca**

**ityabhiṣṭūya vibudhaiḥ(s), seśaḥ(ś) śatadhṛtirharim**

**abhyabhāṣata govindaṃ(m), praṇamyāmbaramāśritaḥ ||20||**

ityabhiṣ + ṭūya, śata + dhṛtir + harim, praṇamyāmbara + māśritaḥ

ब्रह्मोवाच

भूमेर्भारावताराय, पुरा विज्ञापितः(फ्) प्रभो।

त्वमस्माभिरशेषात्मं(व्)स्-तत्तथैवोपपादितम्॥ 21॥

brahmovāca

bhūmerbhārāvatārāya, purā vijñāpitaḥ(ph) prabho

tvamasmābhiraśeṣātmaṃ(v)s-tattathaivopapāditam ||21||

bhūmer + bhārā + vatārāya, tvamasmā + bhira + śeṣāt + maṃ(v)s,

tat + tathaivo + papāditam

धर्मश्च स्थापितः(स्) सत्सु, सत्यसन्धेषु वै त्वया।

कीर्तिश्च दिक्षु विक्षिप्ता, सर्वलोकमलापहा॥ 22॥

dharmaśca sthāpitaḥ(s) satsu, satyasandheṣu vai tvayā

kīrtiśca dikṣu vikṣiptā, sarvalokamalāpahā ||22||

satya + sandheṣu, sarvalo + kamalā + pahā

अवतीर्य यदोर्वं(व्)शे, बिभ्रद् रूपमनुत्तमम्।

कर्माण्युद्दामवृत्तानि, हिताय जगतोऽकृथाः॥ 23॥

avatīrya yadorvaṃ(v)śe, bibhrad rūpamanuttamam

karmāṇyuddāmavṛttāni, hitāya jagato'kṛthāḥ ||23||

rūpa + manuttamam, karmāṇyud + dāmavṛttāni

यानि ते चरितानीश, मनुष्याः(स्) साधवः(ख्) कलौ।

शृण्वन्तः(ख्) कीर्तयन्तश्च, तरिष्यन्त्यञ्जसा तमः॥ 24॥

yāni te caritānīśa, manuṣyāḥ(s) sādhavaḥ(kh) kalau

śṛṇvantaḥ(m) kīrtayantaśca, tariṣyantyañjasā tamaḥ ||24||

kīrtayan + taśca, tariṣ + yantyañ + jasā

यदुवं(व्)शेऽवतीर्णस्य, भवतः(फ्) पुरुषोत्तम।

शरच्छतं(म्) व्यतीयाय, पं(ञ्)चविं(व्)शाधिकं(म्) प्रभो॥ 25॥

yaduvaṃ(v)śe'vatīrṇasya, bhavataḥ(ph) puruṣottama

śaracchataṃ(m) vyatīyāya, pa(ñ)caviṃ(v)śādhikaṃ(m) prabho ||25||

yaduvaṃ(v)śe' + vatīrṇasya, pa(ñ)ca + viṃ(v)śā + dhikaṃ(m)

नाधुना तेऽखिलाधार, देवकार्यावशेषितम्।

कुलं(ञ्) च विप्रशापेन, नष्टप्रायमभूदिदम्॥ 26॥

nādhunā te'khilādhāra, devakāryāvaśeṣitam

kulaṃ(ñ) ca vipraśāpena, naṣṭaprāyamabhūdidam||26||

deva + kāryā + vaśeṣitam, naṣṭa + prāya + mabhūdidam

ततः(स्) स्वधाम परमं(म्), विशस्व यदि मन्यसे।

सलोकाँल्लोकपालान् नः(फ्), पाहि वैकुण्ठ किं(ङ्)करान्॥ 27॥

tataḥ(s) svadhāma paramaṃ(m), viśasva yadi manyase

salokāmllokapālān naḥ(ph), pāhi vaiku(ṇ)ṭhakiṅkarān ||27||

salokāml + loka + pālān

श्रीभगवानुवाच

अवधारितमेतन्मे, यदात्थ विबुधेश्वर।

कृतं(म्) वः(ख्) कार्यमखिलं(म्), भूमेर्भारोऽवतारितः॥ 28॥

śrībhagavānuvāca

avadhāritametanme, yadāttha vibudheśvara

kṛtaṃ(m) vaḥ(kh) kāryamakhilaṃ(m), bhūmerbhāro'vatāritaḥ ||28||

avadhā + ritame + tanme, bhūmer + bhāro' + vatāritaḥ

तदिदं(म्) यादवकुलं(म्), वीर्यशौर्यश्रियोद्धतम्।

लोकं(ञ्) जिघृक्षद् रुद्धं(म्) मे, वेलयेव महार्णवः॥ 29॥

tadidaṃ(m) yādavakulaṃ(m), vīryaśauryaśriyoddhatam

lokaṃ(ñ) jighṛkṣad ruddhaṃ(m) me, velayeva mahārṇavaḥ ||29||

vīrya + śaurya + śriyod + dhatam

यद्यसं(व्)हृत्य दृप्तानां(म्), यदूनां(म्) विपुलं(ङ्) कुलम्।
गन्तास्म्यनेन लोकोऽय-मुद्वेलेन विनङ्क्ष्यति॥ 30॥

yadyasaṃ(v)hṛtya dṛptānāṃ(m), yadūnāṃ(m) vipulaṃ(ṅ) kulam
gantāsmyanena loko'ya - mudvelena vinaṅkṣyati ||30||

yadya + saṃ(v)hṛtya, gantās + myanena, mud + velena

इदानीं(न्) नाश आरब्धः(ख्), कुलस्य द्विजशापतः।
यास्यामि भवनं(म्) ब्रह्मन् -नेतदन्ते तवानघ॥ 31॥

idānīṃ(n) nāśa ārabdhaḥ(kh) kulasya dvijaśāpajaḥ
yāsyāmi bhavanaṃ(m) brahman - netadante tavānagha ||31||

श्रीशुक उवाच

इत्युक्तो लोकनाथेन, स्वयम्भूः(फ्) प्रणिपत्य तम्।
सह देवगणैर्देवः(स्), स्वधाम समपद्यत॥ 32॥

śrīśuka uvāca

ityukto lokanāthena, svayambhūḥ(ph) praṇipatya tam
saha devagaṇairdevaḥ(s), svadhāma samapadyata ||32||

deva + gaṇair + devaḥ(s)

अथ तस्यां(म्) महोत्पातान्, द्वारवत्यां(म्) समुत्थितान्।
विलोक्य भगवानाह, यदुवृद्धान् समागतान्॥ 33॥

atha tasyāṃ(m) mahotpātān, dvāravatyāṃ(m) samutthitān
vilokya bhagavānāha, yaduvṛddhān samāgatān ||33||

mahot + pātān, dvāra + vatyāṃ(m), yadu + vṛddhān

श्रीभगवानुवाच

एते वै सुमहोत्पाता, व्युत्तिष्ठन्तीह सर्वतः।
शापश्च नः(ख्) कुलस्यासीद्, ब्राह्मणेभ्यो दुरत्ययः॥ 34॥

śrībhagavānuvāca

ete vai sumahotpātā, vyuttiṣṭhantīha sarvataḥ

śāpaśca naḥ(kh) kulasyāsīd, brāhmaṇebhyo duratyayaḥ ||34||

sumahot + pātā, vyut + tiṣṭhan + tīha, kulasyā + sīd

न वस्तव्यमिहास्माभिर्-जिजीविषुभिरार्यकाः।

प्रभासं(म्) सुमहत्पुण्यं(म्), यास्यामोऽद्यैव मा चिरम्॥ 35॥

na vastavyamihāsmābhir- jijīviṣubhirāryakāḥ

prabhāsaṃ(m) sumahatpuṇyaṃ(m), yāsyāmo'dyaiva mā ciram ||35||

vastavya + mihās + mābhir + jijī + viṣubhi + rāryakāḥ,

sumahat + puṇyaṃ(m), yāsyāmo' + dyaiva

यत्र स्नात्वा दक्षशापाद्, गृहीतो यक्ष्मणोडुराट्।

विमुक्तः(ख्) किल्बिषात् सद्यो, भेजे भूयः(ख्) कलोदयम्॥ 36॥

yatra snātvā dakṣaśāpād, gṛhīto yakṣmaṇoḍurāṭ

vimuktaḥ(kh) kilbiṣātsadyo, bheje bhūyaḥ(kh) kalodayam ||36||

yakṣmaṇo + ḍurāṭ

वयं(ञ्) च तस्मिन्नाप्लुत्य, तर्पयित्वा पितॄन् सुरान्।

भोजयित्वोशिजो विप्रान्, नानागुणवतान्धसा॥ 37॥

vayaṃ(ñ) ca tasminnāplutya, tarpayitvā pitṝn surān

bhojayitvośijo viprān, nānāguṇavatāndhasā ||37||

tasmin + nāplutya, bhojayitvo + śijo, nānā + guṇa + vatāndhasā

तेषु दानानि पात्रेषु, श्रद्धयोप्त्वा महान्ति वै।

वृजिनानि तरिष्यामो, दानैर्नौभिरिवार्णवम्॥ 38॥

teṣu dānāni pātreṣu, śraddhayoptvā mahānti vai

vṛjināni tariṣyāmo, dānairnaubhirivārṇavam ||38||

śraddha + yoptvā, dānair + naubhi + rivār + ṇavam

śrībhagavānuvāca

ete vai sumahotpātā, vyuttiṣṭhantīha sarvataḥ

śāpaśca naḥ(kh) kulasyāsīd, brāhmaṇebhyo duratyayaḥ ||34||

sumahot + pātā, vyut + tiṣṭhan + tīha, kulasyā + sīd

न वस्तव्यमिहास्माभिर्-जिजीविषुभिरार्यकाः।

प्रभासं(म्) सुमहत्पुण्यं(म्), यास्यामोऽद्यैव मा चिरम्॥ 35॥

na vāstavyamihasmābhir- jijīviṣubhirāryakāḥ

prabhāsaṃ(m) sumahatpuṇyaṃ(m), yāsyāmo'dyaiva mā ciram ||35||

vastavya + mihās + mābhir + jijī + viṣubhi + rāryakāḥ,

sumahat + puṇyaṃ(m), yāsyāmo' + dyaiva

यत्र स्नात्वा दक्षशापाद्, गृहीतो यक्ष्मणोडुराट्।

विमुक्तः(ख्) किल्बिषात् सद्यो, भेजे भूयः(ख्) कलोदयम्॥ 36॥

yatra snātvā dakṣaśāpād, gṛhīto yakṣmaṇoḍurāṭ

vimuktaḥ(kh) kilbiṣāt sadyo, bheje bhūyaḥ(kh) kalodayam ||36||

yakṣmaṇo + ḍurāṭ

वयं(ञ्) च तस्मिन्नाप्लुत्य, तर्पयित्वा पितृन् सुरान्।

भोजयित्वोशिजो विप्रान्, नानागुणवतान्धसा॥ 37॥

vayaṃ(ñ) ca tasminnāplutya, tarpayitvā pitṝn surān

bhojayitvośijo viprān, nānāguṇavatāndhasā ||37||

tasmin + nāplutya, bhojayitvo + śijo, nānā + guṇa + vatāndhasā

तेषु दानानि पात्रेषु, श्रद्धयोप्त्वा महान्ति वै।

वृजिनानि तरिष्यामो, दानैर्नौभिरिवार्णवम्॥ 38॥

teṣu dānāni pātreṣu, śraddhayoptvā mahānti vai

vṛjināni tariṣyāmo, dānairnaubhirivārṇavam ||38||

śraddha + yoptvā, dānair + naubhi + rivār + ṇavam

श्रीशुक उवाच

एवं(म्) भगवताऽऽदिष्टा, यादवाः(ख्) कुलनन्दन।
गन्तुं(ङ्) कृतधियस्तीर्थं(म्), स्यन्दनान् समयूयुजन्॥ 39॥

śrīśuka uvāca

evaṃ(m) bhagavatā''diṣṭā, yādavāḥ(kh) kulanandana
gantuṃ(ṅ) kṛtadhiyastīrthaṃ(m), syandanān samayūyujan ||39||

kṛta + dhiyas + tīrthaṃ(m), samayū + yujan

तन्निरीक्ष्योद्धवो राजन्, श्रुत्वा भगवतोदितम्।
दृष्ट्वारिष्टानि घोराणि, नित्यं(ङ्) कृष्णमनुव्रतः॥ 40॥

tannirīkṣyoddhavo rājan, śrutvā bhagavatoditam
dṛṣṭvāriṣṭāni ghorāṇi, nityaṃ(ṅ) kṛṣṇamanuvrataḥ ||40||

tan + nirīkṣyod + dhavo, bhagavato + ditam, dṛṣṭvā + riṣṭāni, kṛṣṇa + manuvrataḥ

विविक्त उपसं(ङ्)गम्य, जगतामीश्वरेश्वरम्।
प्रणम्य शिरिसा पादौ, प्रां(ञ्)जलिस्तमभाषत॥ 41॥

vivikta upasa(ṅ)gamya, jagatāmīśvareśvaram
praṇamya śirisā pādau, prā(ñ)jalistamabhāṣata ||41||

jagatā + mīś + vareś + varam, prā(ñ)jalis + tama + bhāṣata

उद्धव उवाच

देवदेवेश योगेश, पुण्यश्रवणकीर्तन।
सं(व्)हृत्यैतत् कुलं(न्) नूनं(म्), लोकं(म्) सन्त्यक्ष्यते भवान्।
विप्रशापं(म्) समर्थोऽपि, प्रत्यहन्न यदीश्वरः॥ 42॥

uddhava uvāca

devadeveśa yogeśa, puṇyaśravaṇakīrtana .
saṃ(v) hṛtyaitat kulaṃ(n) nūnaṃ(m), lokaṃ(m) santyakṣyate bhavān
vipraśāpaṃ(m) samartho'pi, pratyahanna yadīśvaraḥ ||42||

puṇya + śravaṇa + kīrtana, saṃ(v)hṛtyai + tat, san + tyakṣyate, pratyahan + na

**नाहं(न्) तवाङ्घ्रिकमलं(ङ्), क्षणार्धमपि केशव।**

**त्यक्तुं(म्) समुत्सहे नाथ, स्वधाम नय मामपि॥ 43॥**

**nāhaṃ(n) tavāṅghrikamalaṃ(ṅ), kṣaṇārdhamapi keśava**

**tyaktuṃ(m) samutsahe nātha, svadhāma naya māmapi ||43||**

tavāṅghri + kamalaṃ(ṅ), kṣaṇār + dhamapi

**तव विक्रीडितं(ङ्) कृष्ण, नृणां(म्) परममङ्गलम्।**

**कर्णपीयूषमास्वाद्य, त्यजन्त्यन्यस्पृहां(ञ्) जनः॥ 44॥**

**tava vikrīḍitaṃ(ṅ) kṛṣṇa, nṛṇāṃ(m) paramamaṅgalam**

**karṇapīyūṣamāsvādya, tyajantyanyaspṛhāṃ(ñ) janāḥ ||44||**

karṇa + pīyū + ṣamās + vādya, tyajantyan + yaspṛhāṃ(ñ)

**शय्यासनाटनस्थानस्-नानक्रीडाशनादिषु।**

**कथं(न्) त्वां(म्) प्रियमात्मानं(म्), वयं(म्) भक्तास्त्यजेमहि॥ 45॥**

**śayyāsanāṭanasthānas - nānakrīḍāśanādiṣu**

**kathaṃ(n) tvāṃ(m) priyamātmānaṃ(m), vayaṃ(m) bhaktāstyajemahi ||45||**

śayyā + sanā + ṭanas + thānas + nāna + krīḍā + śanādiṣu, bhaktās + tyajemahi

**त्वयोपभुक्तस्रग्गन्ध-वासोऽलङ्कारचर्चिताः।**

**उच्छिष्टभोजिनो दासास्-तव मायां(ञ्) जयेमहि॥ 46॥**

**Tvayopabhuktasraggandha - vāso'laṅkāracarcitāḥ**

**ucchiṣṭabhojino dāsās- tava māyāṃ(ñ) jayemahi ||46||**

Tvayopa + bhuktas + rag + gandha , vāso' + laṅkāra + carcitāḥ, ucchiṣṭa + bhojino

**वातरशना य ऋषयः(श्), श्रमणा ऊर्ध्वमन्थिनः।**

**ब्रह्माख्यं(न्) धाम ते यान्ति, शान्ताः(स्) सं(न्)न्यासिनोऽमलाः॥ 47॥**

**Vātaraśanā ya ṛṣayaḥ(ś), śramaṇā ūrdhvamanthinaḥ**

**brahmākhyaṃ(n) dhāma te yānti, śāntāḥ(s) sa(n)nnyāsino'malāḥ ||47||**

ūrdhva + manthinaḥ, sa(n)nnyā + sino' + malāḥ

वयं(न्) त्विह महायोगिन्, भ्रमन्तः(ख्) कर्मवर्त्मसु।
त्वद्वार्तया तरिष्यामस्-तावकैर्दुस्तरं(न्) तमः॥ 48॥

vayaṃ(n) tviha mahāyogin, bhramantaḥ(kh) karmavartmasu
tvadvārtayā tariṣyāmas - tāvakairdustaraṃ(m) tamaḥ ||48||

tvad + vārtayā, tāvakair + dustaraṃ(m)

स्मरन्तः(ख्) कीर्तयन्तस्ते, कृतानि गदितानि च।
गत्युत्स्मितेक्षणक्ष्वेलि, यन्नृलोकविडम्बनम्॥ 49॥

smarantaḥ(kh) kīrtayantaste, kṛtāni gaditāni ca
gatyutsmitekṣaṇakṣveli, yannṛlokaviḍambanam ||49||

kīrtayan + taste, gatyut + smite + kṣaṇa + kṣveli, yan + nṛloka + viḍambanam

श्रीशुक उवाच
एवं(म्) विज्ञापितो राजन्, भगवान् देवकीसुतः।
एकान्तिनं(म्) प्रियं(म्) भृत्य-मुद्धवं(म्) समभाषत॥ 50॥

śrīśuka uvāca
evaṃ(m) vijñāpito rājan, bhagavān devakīsutaḥ
ekāntinaṃ(m) priyaṃ(m) bhṛtya- muddhavaṃ(m) samabhāṣata ||50||

mud + dhavaṃ(m)

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)
सं(व्)हितायामेकादशस्कन्धे षष्ठोऽध्यायः।।

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(v)syāṃ(m)
saṃhitāyāṃ(v) ekādaśaskandhe ṣaṣṭho'dhyāyaḥ|

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

**Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudācyate|**

**Pūrṇāsya Pūrṇamādāya Pūrṇamevāvashiṣyate ||**

**Om Shāntih(ś) Shāntih(ś) Shāntih ||**

